## चन्द्रापीडं प्रति शुकनासोपदेशः

महाजनो येन गतो सः पन्था — इति महाभारतवचनेन वयं सन्मार्गं जिगमिषामः। जीवननिर्वाहनार्थं गुरोरुपदेशः सर्वाग्रे प्रयोजनः भवति। नीतिवाक्यं हृदयं नीत्वा जीवनमार्गे गन्तुं शक्नुमः। तस्मात् गुरुगृहात् विद्यार्जनं समाप्य चन्द्रापीडः यदा गृहं प्रत्यागच्छति तदा शुकनासः तमुपदेशयति। यतः चन्द्रापीडस्य जनकः तारापीडः तं उज्जयिनीसिंहासने अभिषिक्तुमिच्छति। तारापीडस्य प्राज्ञः प्रवीणः महामात्यः शुकनासः चन्द्रापीडाय यान् उपदेशान् प्रयच्छति तान् अधः वर्णयामः।

यौवनप्रभावेन मानवमनसि यः तिमिरः आगच्छति, सः कोऽपि सूर्यप्रभया न दूरीभवति। अतः शुकनासेन उच्यते — 'अतिगहनं तमो यौवनप्रभवम्'। अतः कथ्यते — अपरिणामोपशमो दारुणो लक्ष्मीमदः।

यौवनागमे कामक्रोधादियुक्ते चित्ते भोग्यपदार्थाः मधुराः मन्यते। अस्मिन् वयसि सद् गुरुवाक्यं



तेषां सन्मार्गे प्रेरितुं शक्नोति। अधुना चन्द्रापीडोऽपि विषये अनासक्तः। अतः उपदेशग्रहणाय उपयुक्तः कालोऽयम् — इयमेव चानाख्यातं विषयरसस्य ते काल उपदेशस्य।

यौवनविषये उपदेशात् परं शुकनासः लक्ष्मीचञ्चलतां वर्णयति। लक्ष्म्या कुल-शील-मान-विद्या-बुद्धि-धर्मश्च न गृह्यते। विदुषः जनान् सा परित्यजति। लक्ष्मीकृपाकटाक्षेन राज्ञां बुद्धिः नश्यते। धनमोहे ते नृपाः स्वं देवं मन्यते। लक्ष्मीः यत्र यत्र आविर्भूता भवति तत्र तत्र पापकर्म जनयति — यथा यथा चेयं चपला दीप्यते तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति।

लक्ष्मीचरित्रं वर्णयित्वा चाटुकाराणां स्वभावः वर्ण्यते शुकनासेन। ते धूर्ताः स्वार्थान्वेषिणः भवन्ति। राज्ञः दोषान् ते गुणरूपेण राजसमीपे समुपस्थापयन्ति। अनेन धूर्तानां स्तुतिवचनेन राजा स्वं शिवं मन्यते। मिथ्यामद

मिथ्यामाहात्म्यं गर्वितः राजा देवान्
न प्रणमति, गुरुजनेभ्यः न सम्मानं
प्रयच्छति, विदुषः उपहसति, अमात्यानाम्-
मुपदेशं न शृणोति, केवलं चाटुकाराणा-
मधुरमतिकरवाक्यं गृह्णाति। चन्द्रापीडः
गुरुजनेभ्यः न तिरस्कृतं भवतु, मित्रान्
निकषा नोपहासास्पदं भवतु ~~इति~~ इति
शुकनासस्याभिलाषः।

~~लक्ष्मी~~

लक्ष्मीदेव्याः कृपया राजानः
व्यसनासक्ताः भवन्ति शास्त्रनिषिद्धानि
कर्माणि कुर्वन्ति ~~च~~ ~~च~~ च। अतः
चन्द्रापीडः व्यसनं परित्यज्य प्रजापाल-
यतु अयमेव शुकनासस्याभिप्रायः।